इति वैद्यकक्रिमिरोगपथ्यापथ्यविधिग्रन्थे ॥)

क्रिमिकण्टकं, क्ली, (क्रिमौ कण्टकमिव ।) कृमिकण्टकम् । इति मेदिनी ॥

क्रिमिघ्नः, पुं, (क्रिमिं हन्ति नाशयतीति । "अमनुष्यकर्त्तृके च" । ३ । २ । ५३ । इति टक् । मूलविभुजादित्वात् सिद्धः । अत् पूर्व्वस्येति नियमान्न णत्वम् ।) कृमिघ्नः । विड़ङ्गः । इत्यमरटीकायां रमानाथः ॥ (क्रिमिरोगनाशकौषधविशेषः ।
"क्रिमिघ्नं किंशुकारिष्टबीजं सरसमक्षकम् ।
वन्यदयस्याखुपर्णीरसैः क्रिमिविनाशनः" ॥
इति क्रिमिघ्नो रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे क्रिम्यधिकारे ॥)

क्रिमिघ्नी, स्त्री, (क्रिमिघ्न + टित्वात् स्त्रियां ङीप् ।) सोमराजी । इति शब्दचन्द्रिका ॥

क्रिमिजं, क्ली, (क्रिमिभ्यः जायते इति । "अन्येष्वपि दृश्यते" ।३।२।१०१। इति डः ।) अगुरु । इत्यमरः ॥

क्रिमिजा, स्त्री, (क्रिमिज + स्त्रियां टाप् ।) लाक्षा । इति रत्नमाला ॥

क्रिमिशत्रुः, पुं, (क्रिमेः शत्रुरिव नाशकत्वात् ।) रक्तपुष्पकः । इति शब्दचन्द्रिका । पालितामादार इति भाषा ॥

क्रिमिशात्रवः, पुं, (शत्रु + स्वार्थे अण् शात्रवः । क्रिमेः शात्रव इव तन्नाशकत्वात् ।) विट्खदिरः । इति शब्दचन्द्रिका ॥

क्रिमिशैलः, पुं, (क्रिमिभिर्निर्म्मितः शैल इव ।) वल्मीकः । इति त्रिकाण्डशेषः ॥

क्रियः, पुं, (क्रिया प्रदक्षिणमावर्त्तनक्रिया विद्यतेऽस्य अर्शआदेरच् ।) मेषराशिः । इति दीपिका ॥

क्रिया, स्त्री, (क्रियते अनया असौ अस्मिन् इति वा । डु कृ ञ् करणे करणकर्म्माधिकरणादौ च यथायथं श प्रत्ययः । "रिङ् शयग्लिङ्क्षु" । ७ । ४ । २८ । इति रिङादेशः । "अचिश्नुधातुभ्रुवां य्वोरियङुवङौ" । ६ । ४ । ७७ । इति इयङ् ।) आरम्भः । निष्कृतिः । शिक्षा । पूजनम् । सम्प्रधारणम् । उपायः । कर्म्म । तन्नवविधम् । यथा,—
"आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम् ।
उपायः कर्म्म चेष्टा च चिकित्सा च नव क्रियाः" ॥
इति भावप्रकाशः ॥ चेष्टा । चिकित्सा । इत्यमरः । ३ । ३ । १५६ ॥ कारणम् । इति हेमचन्द्रः ॥ श्राद्धम् । इत्यमरटीकायां स्वामी ॥ शौचम् । इति शब्दरत्नावली ॥ धात्वर्थः करोत्यर्थो वा । इति वैयाकरणाः ॥ क्रियाः साध्यरूपाः वस्तुधर्म्माः पाकादयः एव हि अधिश्रयणावश्रयणान्तादिः पूर्व्वापरीभूतो व्यापारकलापः पाकादिशब्दवाच्यः । इति साहित्यदर्पणम् ॥ चतुःप्रकारव्यवहारपादान्तर्गतव्यवहारपादविशेषः । सा द्विधा मानुषी दैविकी च । तत्राद्या साक्ष्यलेख्यानुमानभेदेन त्रिधा । द्वितीया घटाग्न्युदकविषकोषतण्डुलतप्तमाषकफालधर्म्मजभेदेन नवधा दिव्यानि । यथा,—
"द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी । तथा
साक्ष्यलेख्यानुमानञ्च मानुषी त्रिविधा स्मृता ।
घटाद्या धर्म्मजान्ताश्च दैविकी नवधा स्मृता" ॥
इति व्यवहारतत्त्वे बृहस्पतिः ॥ (चिकित्साकार्य्यं यथा,—चरके सूत्रस्थाने १७ अध्याये ॥
"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः ।
सा चिकित्सा विकाराणां कर्म्मतद्भिषजां मतम् ॥
कथं शरीरे धातूनां वैषम्यं न भवेदिति ।
समानाञ्चानुबन्धः स्यादित्यर्थं क्रियते क्रिया" ॥
"याह्युदीर्णं शमयति नान्यं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्" ॥
शीते शीतप्रतीकार उष्णेचोष्णनिवारणम् ।
कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत्" ॥
इति च सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

क्रियाकारः,पुं, (क्रियां शिक्षारम्भं करोतीति । कृ + उपपदे "कर्म्मण्यण्" ३ । २ । १ । इत्यण् ।) नवच्छात्रः । नूतन पड़ुया इति भाषा । इति त्रिकाण्डशेषः ॥ कर्म्मकर्त्तरि त्रि ॥

क्रियाद्वेषी, [न्] पुं, (क्रियां व्यवहाराङ्गसाधनं साक्षिलेख्यादिकं द्वेष्टि । द्विष् + णिनिः ।) साक्ष्यलिखितभुक्तियुक्तिशपथद्वेष्टा । स च व्यवहारविषये पञ्चधा । हीनान्तर्गतहीनविशेषः । यथाह,—व्यवहारतत्त्वे नारदः ।
"अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः" ॥
(तल्लक्षणं यथा । वीरमित्रोदयधृतकात्यायनवचने ।
"लेख्यञ्च साक्षिञ्चैव क्रिया ज्ञेया मनीषिभिः ।
तां क्रियां द्वेष्टि यो मोहात् क्रियाद्वेषी स उच्यते" ॥)
कर्म्मद्वेष्टरि त्रि ॥

क्रियापादः, पुं, (क्रिया विवादसाधनं पाद इव ।) चतुष्पाद्व्यवहारान्तर्गततृतीयपादः । यथा,—
"पूर्व्वपक्षः स्मृतः पादो द्वितीयश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः" ॥
इति बृहस्पतिः ॥ स च साक्ष्यलिखितभुक्तियुक्तिशपथरूपः । इति व्यवहारतत्त्वम् ॥

क्रियाभ्युपगमः, पुं, (क्रियायाः कर्षणादिक्रियार्थं अभ्युपगमः स्वीकारः ।) परस्परक्रियास्वीकारः । द्वयोः पुरुषयोः कस्मिंश्चिद्विषये परस्पराङ्गीकारेण अनुमतिः । यथा,—
"क्रियाभ्युपगमात् क्षेत्रं बीजार्थं यत् प्रदीयते ।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च" ॥
इति मनुः ॥ अस्यार्थः । "यदत्रापत्यं भविष्यति तदावयोरुभयोरेवेति नियमेनैतत् क्षेत्रस्वामिना बीजवपनार्थं यद्बीजिने दीयते तस्यापत्यस्य लोके बीजिक्षेत्रिणौ द्वावपि भागिनौ दृष्टौ" । इति कुल्लूकभट्टः ॥ उपलक्षणमेतत् ॥

क्रियायोगः, पुं, (क्रियैव योगः योग उपायः ।) देवाराधनतदालयादिकरणरूपपुण्यक्रिया । यथा,—
नारद उवाच ।
"क्रियायोगः कथं प्रोक्तस्त्वया मे प्रपितामह ! ।
तदहं श्रोतुमिच्छामि फलं चास्य यथातथम् ॥
ब्रह्मोवाच ।
ज्ञानयोगस्तु योगस्य यस्तु साधनमात्मना ।
यस्तु बाह्यार्थसंयोगः क्रियायोगः स उच्यते ॥
प्रधानं कारणं योगो मुक्तेर्मुनिवरोत्तम ! ।
क्रियायोगस्तु योगस्य परमं तात ! साधनम् ॥
यदेतद्भवता पृष्टं तदिहैकमनाः शृणु ।
यैस्तु देवालयं विष्णोः शुभं दारुमयं कृतम् ॥
कारयेन्मृण्मयं वापि शृणु तस्य फलं मुने ! ।
अहन्यहनि योगेन यजतो यन्महाफलम् ॥
प्राप्नोति तत् फलं विष्णोर्यः कारयति मन्दिरम् ।
कुलानां शतमागामि समतीतं तथा शतम् ॥
कारयेद्भगवद्धाम नयत्यच्युतमन्दिरम् ।
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ॥
विष्णोरालयविन्यासप्रारम्भादेव नश्यति ।
पतितं पतमानन्तु तथार्द्धपतितं तथा ॥
समुद्धृत्य हरेर्द्धाम द्विगुणं फलमाप्नुयात् ॥
"प्रतिमां लक्षणवतीं यः कुर्य्याच्चैव मानवः ॥
केशवस्य परं लोकमक्षयं प्रतिपद्यते ।
अनुज्ञातो मया राज्ये यमो राजाथ किङ्कराः ॥
केवलं ये जगद्धाममनन्तं समुपाश्रिताः ।
भवद्भिः परिहर्त्तव्यास्ते तेषां नास्तीह संस्थितिः ॥
नमः कृष्णाच्युतानन्त वासुदेवेत्युदीरितम् ।
यैर्भावभावितैर्दूरात्ते च त्याज्याः सुदूरतः ॥
दानं ददद्भिर्यैरुक्तमच्युतः प्रीयतामिति ।
श्रद्धापुरःसरैर्नित्यं ते च त्याज्याः सुदूरतः" ॥
इत्याद्ये वह्निपुराणे वैष्णवक्रियायोगे यमानुशासननामाध्यायः ॥ तथा च पातञ्जले ।
"तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" ॥)

क्रियावसन्नः, त्रि, (क्रियया अवसन्नः ।) साक्ष्यादिना प्राप्तपराजयः । यथा,—
"स्वयमभ्युपपन्नो हि स्वचर्य्यावसितोऽपि सन् ।
क्रियावसन्नो वादे तु परं सभ्यावधारणम्" ॥
इति व्यवहारतत्त्वम् ॥

क्रियावान्, [त्] त्रि, (क्रिया अस्यास्तीति मतुप् । मस्य वः ।) कर्म्मसूद्यतः । क्रियासु नियुक्तः । इत्यमरः ।३।१।१८॥ (यथा, भट्टिः । १ । १० ।
"पुत्त्रीयता तेन वराङ्गनाभि-
रानायि विद्वान् क्रतुषु क्रियावान्" ॥)

क्रियावादी, [न्] पुं, (क्रियां क्रियासाध्यं वदति । वद + णिनिः ।) प्रमाणवादी । कार्य्यवादी । इति मिताक्षरा ॥ फरियादी इति पारस्यभाषा ॥

क्रियेन्द्रियं, क्ली, (क्रियायाः कर्म्मणः साधनं इन्द्रियम् ।) कर्म्मेन्द्रियम् । इति हेमचन्द्रः ॥ (तानि च पञ्चसंख्यकानि ज्ञानकर्म्मभेदेन दशसंख्यकानि च प्रसिद्धानि मनस्तु उभयात्मकं सर्व्वेषां प्रवर्त्तकम् । यथा मनौ ।
"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थपाणिपादवाक् चैव दशमी स्मृता" ॥)

क्री, ड ञ श द्रव्यपर्य्यये । इति कविकल्पद्रुमः ॥ (क्र्यां-उभं-सकं-अनिट् ।) पर्य्यायः परीवर्त्तः । ड, क्रीत्रिमम् । ञ श, क्रीणाति क्रीणीते धान्यं धनेन लोकः । इति दुर्गादासः ॥

क्रीड़, ऋ खेले । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) ऋ, अचिक्रीड़त् । क्रीड़ति